शोध-शीर्षकः

न्यायसिद्धान्तमुक्तावल्यां शव्दखण्डे दिनकरीव्याख्या- रामरूद्रीव्याख्याभ्यां तुलनात्मकम् अध्ययनम्

राँची विश्वविद्यालये संस्कृतविभागे विद्यावारिधि(Ph.D)इत्युपाधिप्राप्तये प्रस्तावितः शोधविषयः

मानविकी-संकायः

शोधनिर्देशिका -

डॉ दीपिका टोप्पो ,

असिस्टेंट प्रोफेसर ,संस्कृत विभागः ,

डोरंडा महाविद्यालयः , राँची।

गवेषकः-

स्बरूप-घोषः

प्रस्तावना

प्राचीनकालात: भारतदेशे संस्कृतभाषां अतीव महत्वपूर्णस्थानं वर्तते। सुप्राचीनकालात् भारतवर्षे दर्शनचर्चा परिलक्ष्यते। ऋग्वेदे दशममण्डले पुरुषसूक्ते, नासदीयसूक्ते , देवीसूक्ते ज्ञानसूक्ते च दार्शनिकत्वं समृद्धम्। तस्य प्रमाणम-

पुरुष एवेदं सर्वंयद्भूतं यच्च भव्यम ।

उतामृतत्वस्येशानो यदह्नेनाऽतिरति।।

भारतस्य षट आस्तिकदर्शनेषु न्यायदर्शनम् अन्यतमम् अस्ति। षट्आस्तिकदर्शनानि सांख्य-योग-न्याय-वैशेषिक-पूर्वमीमांसा- वेदान्ता: भवन्ति । भारतीयदर्शनेषु सांख्यदर्शनं प्राचीनतम। सांख्यदर्शनस्य प्रवक्ता कपिलमुनि :। अस्मिन् सांख्यदर्शने उक्तं यत् पुरुषः प्रकृतिः इत्यादि २५ तत्त्वैः सम्यक ज्ञानं प्राप्य मोक्षं प्राप्यते।महर्षि पतंजलि योगदर्शनस्य प्रवक्ता। सांख्यदर्शनस्य २५ तत्त्व सह योगदर्शनम् ईश्वरतत्त्वं स्वीकरति। अथ योगदर्शनस्य तत्त्वसंख्या षडविंशति: । वैशेषिक दर्शनस्य प्रवक्ता महर्षि कणाद: । वैशेषिका: पिलुपाकवादिन: ।वैशेषिका: जगत्कारणम् ईश्वरं स्वीकुर्वन्ति। ईश्वरस्य इच्छया परमाणुसंयोगेण सृष्टि रचिता। मीमांसादर्शनस्य मुख्यग्रन्थ: मीमांसासूत्रस्य प्रवक्ता महर्षि: जैमिनि: । मीमांसाक: निरीश्वरवादिन: । किन्तु ते वेदोक्तम् ईश्वरं स्वीकुर्वन्ति। वेदान्त नाम उपनिषत् प्रमाणम्। वेदान्तदर्शनस्य मुख्य प्रवक्ता महर्षि: वादरायण: । वेदान्तदर्शनस्य आलोच्य विषय:- " ब्रह्मसत्यं जगन्मिथ्या जीवब्रह्मैव नापर: । "

शोधनविषयस्य उद्देश्यानि (Objectives)

(१) शब्दबोधनिरूपणं न्यायदर्शने अनुमानव्याप्तेः सदृशम्। फलतः अयं विषयः मया पाठकस्य समक्षं सुलभतया प्रस्तुतुं शक्यते ।

(२) न्यायसिद्धान्तमुक्तावली इति ग्रन्थस्य विविधपक्षविमर्शे कारकसमासयोः अनेकाः अवधारणाः प्रदत्ताः सन्ति । पाठकस्य कृते व्याकरणस्य ज्ञानमपि महत्त्वपूर्णम् अस्ति।

(३) आकांक्षा- योग्यता –आसत्ति-तात्पर्यज्ञानं वाक्यानां प्रयोगे तेषां महत्त्वं पाठकम् अवगतं कर्तं शक्यते।

कृतपूर्वशोधनकार्याणि (literature review)

कस्मिन्नपि संशोधनं कुर्वन कस्मिन विषये किं किं संशोधनं जातम एतस्य ज्ञानम् अतीव आवश्यकम्। न्यायसिद्धांतमुक्तावल्यामुपरि शव्दखण्डे दिनकरीटीका- रामरूद्रीव्याख्याभ्यां तुलनात्मक अध्ययनं विषये स्वतंत्र संशोधनं नास्ति। यदा तस्य शोध स्वीकुर्वन् तदा अस्मिन् अस्मिन् विषये एम. फिल, पिएच. डी. मध्ये

क: अपि संशोधनं न कृतम्। परन्तु न्यायसिद्धांतमुक्तावल्यां शव्दखण्डमुपरि पंचाननशास्त्रीकृत एक समीक्षात्मकाध्ययनम् विषये शोधनम् अस्ति।

शोधनपद्धति (methodology)

विश्वनाथाचार्य: विरचित न्यायसिद्धांतमुक्तावली नव्यन्यायस्य अन्यतम ग्रन्थ अस्ति।प्रस्तुत शोधप्रबंधे न्यायसिद्धांतमुक्तावल्यां शव्दखण्डे दिनकरीटीका- रामरूद्रीव्याख्याभ्यां तुलनात्मक अध्ययनम् कर्तुं समीक्षात्मक पद्धते: उपयोग क्रियते। अध्ययनानन्तरम् आवश्यकतानुसारं विश्लेषणपद्धते: विवेचनपद्धते: तुलनात्मकपद्धते: उपयोग क्रियते।

प्रथमाध्याय:- न्यायदर्शनं भारतस्य षट् आस्तिकदर्शनेषु अन्यतमम् अस्ति । अस्य प्रवर्तकः अक्षपदगौतमः ऋषिः अस्ति। यस्य न्यायसूत्रम् अस्य दर्शनस्य प्राचीनतमं प्रसिद्धं च ग्रन्थम् अस्ति । येन साधनेन वयं ज्ञेयतत्त्वानां ज्ञानं प्राप्नुमः, तानि साधनानि 'न्याय' इति उच्यन्ते। 'न्याय' इति परिभाषयन् उक्तवान्- नीयते विवक्षितार्थाः अनेन इति न्यायः। येन साधनेन वयं स्वविवाक्षित (ज्ञेय) तत्त्वं प्राप्नुमः, तत् ज्ञातुं समर्थाः भवेम, तस्य अर्थः न्यायः एव।अर्थात् यस्य साहाय्येन कश्चन सिद्धान्तः प्राप्तुं शक्यते, सः न्यायः इति उच्यते । न्यायः प्रमाणस्य आधारेण निर्णयं प्राप्नोति। एतत् मुख्यतया तर्कः ज्ञानविज्ञानं च अस्ति । तर्कः प्रमाशास्त्रं हेतुविद्या च अन्विक्षिकी च कथ्यते ।
विश्वनाथपञ्चानन द्वारा लिखित न्यायसिद्धांतमुक्तावली नव्यन्यायस्य प्रसिद्धं ग्रन्थम् अस्ति। विश्वनाथपञ्चाननस्य जन्म १७ शतके , नवद्वीपबंगदेशे अभवत् । तस्य पितुः नाम विद्यानिवासः आसीत् । सः रघुनाथशिरोमणे: शिष्यपरम्परायां गण्यते। तेन लिखितं भाषापरिच्छेदग्रन्थं कारिकावली अपर इति नाम्ना अपि प्रसिद्धम् अस्ति । सः भाषापरिच्छेदविषये स्वयमेव व्याख्यात्मकं भाष्यं लिखितवान्, यस्य नाम न्यायसिद्धांतमुक्तावली अस्ति।

द्वितीयाध्याय : (शक्तिविचार:) न्यायसिद्धान्तमुक्तावल्या: शब्दखण्डविषये उक्तं यत् -

पदज्ञानं तु करणं करणं द्वारं तत्र पदार्थधी: ।

शाब्दवोध: फलं तत्र शक्तिधी: सहकारिणी ।। “

दिनकरीटीका:- दिनकरभट्टः शब्दखण्डस्य प्रारम्भे उपजीव्य- उपजीवकभावसंगतिमविषये चर्चां करोति । शब्दप्रमानम् उपजीवकम् उपमानप्रमानं उपजीव्यम् इति स्वीक्रियते। पदानां ज्ञानं शाव्दबोधस्य करणम्। ज्ञानमनो वा ज्ञानसम्बन्धी शब्दः करणं न भवितुमर्हति। यदि ज्ञानमान पदं शब्दबोधस्य प्रत्यभिज्ञायते तर्हि शब्दप्रमानस्य शब्दबोधस्याभावः भवति। शब्दोच्चारणं विना मनुष्यः हस्तचेष्टादे: अपरस्य ज्ञानं जनयितुं समर्थः भवति । अभिधालक्षणाशब्दयो: मध्ये पदजन्यसामग्री अन्यैः उपायैः पदजन्यसामग्रीयां वर्तते इति उक्तम् । शक्तिः शब्दद्पदार्थसन्निधौ ज्ञायते। अस्याः शक्तिः अन्यत् नाम संकेतः इति । एतत् संकेतं ईश्वरस्य इच्छा अस्ति।

रामरूद्रीटीका:- सादृश्यज्ञानमेव उपमानमीति नवीन मते तु उपमीति द्वारा शाव्दबोधनिष्टस्य उपमानोपजीवकत्वस्य स्वाश्रयकरणत्वरुप: परम्परासंबन्धेन शब्दनिष्टत्वं बोद्धम इति भाव। तत् न श्रद्धेयं। सादृश्यज्ञानत्मक उपमाणजन्यत्वस्य साक्षातसम्बन्धेनैव उपमितौ सत्त्वादुपमीतेरपि पदज्ञानरुपत्वेन शव्दप्रमानरूपत्वात् स्वरुपत एव संगतिसंम्भवात्। यद्यपि शाब्दवोधस्य उपमानत्वनये उपमाने अपि शव्दोपजीवकत्वम् अस्ति शब्दनिरुपशब्दनिरुपण अनन्तरमेव उपमानं कुत न निरुपितमिति वक्तं शक्यते तथापि संगते: अनन्तराभिधानव्याप्यत्वाभावेन न दोष:।

तृतीयाध्याय: (लक्षणानिरूपणम्)- न्यायसिद्धांतमुक्तावल्या: लक्षणाविषये उक्तं यत् -

" लक्षणा शक्यसम्बन्धस्तात्पर्यानुपपत्तित : ।

आसत्तिर्योग्यताकांक्षा- तात्पर्य्यज्ञानमीष्यते।।"

दिनकरी टीका- वक्तुः अभिप्रायः "वक्तुरिच्छा तात्पर्यम्" इति ।"गङ्गायां घोष: प्रतिवासति" अत्र वक्तुः इच्छानुसारम् अर्थात् तात्पर्यार्थं गङ्गाशब्दे लक्षणा स्वीकृतवान।अत्र गङ्गा शब्दस्य उल्लेखं विना यदि घोषस्य लक्षणा स्वीक्रियते तर्हि वक्तुः अभिप्रायः अर्थः वा दुर्निरूपितः भविष्यति। यदि वक्ता मत्स्याः गङ्गायां निवसन्ति इति बोधयितुं अभिप्रायं कृतवान् तर्हि सः "गंगायां घोषः प्रतिवसति" इति वाक्यं प्रयुक्तवान् स्यात्, तर्हि वक्तुः अभिप्रायः तात्पर्यार्थं वा घोषशब्दे लक्षणा स्वीकृतवान ।तस्मिन् समये घोषशब्दे लक्षणा न स्वीकृयते, गङ्गाशब्दे स्वीकृयते तर्हि तात्पर्यार्थम् अनुपपत्ति भवति।   । प्रथमतया गंगाशब्दे लक्षणा स्वीकृयते तर्हि गङ्गातीर अवगताः अभवन् । द्वितीयस्थाने यदि घोषपदे लक्षणा प्रत्यभिज्ञायते तर्हि गंगामत्स्यं प्रतीयते। तात्पर्यार्थं लक्षणया: बीजः अस्ति। "गंगायां घोष" इत्यादीनि वक्तुः अभिप्रायेन अर्थानुसारेण वा तदनुसारं लक्षणा भवति। अन्वयानुपपत्ति लक्षणाया: बीजं सम्यक् न भवति। यतो हि "काकेव्यो दधि रक्ष्यताम्,"छत्रिनो यास्ति" इत्यादिषु स्थाने वाक्ये पदार्थाः परस्परं न सम्बद्धाः,तात्पर्यभावात् तु अत्र लक्षणावृत्ति: प्रत्यभिज्ञायते। अत एव विश्वनाथाचार्य कारिकायां कथयति – तात्पर्यानुपपत्तित: लक्षणा स्वीक्रियते।

रामरुद्रीटीका-लक्ष्यतावच्छदके लक्षणं न भवति । "गङ्गायां घोष:" इत्यत्र गङ्गायाः तटे लक्षणा वर्तते, न तु तटत्वे गङ्गातटत्वे । यतो लक्ष्यतावच्छेदके लक्षणाभावात् शाब्दवोध जायते । शाक्यर्थ परम्परसंबन्धे लक्षणा वर्तते, तत्र लक्षित- लक्षणा इति भवति। यथा "द्विरेफ्"।

लक्ष्यार्थं तात्पर्य: कारणम्। वहुब्रीहिसमासे लक्षणाया: शाब्दवोध जायते। यदि तस्मिन् वहुब्रीहिसमासे - चित्रगुपदादिषु एकादेशान्वय सम्भवति तर्हि गोस्वामिनि गोपदस्य लक्षणा प्रत्यभिज्ञातः तर्हि गोस्वामी एकदेशान्वय: गोपदर्थं प्रति चित्रा अभेदान्वय: भविष्यति। यदि एकदेशे अन्वय   न स्वीकृतं तर्हि गोस्वामीन: लक्षणा स्वीकृतवान। चित्रपदं तात्पर्यस्य ग्राहक-सामग्री अर्थात् अत्र गोपादः अवगच्छतु "चित्रपद-गो-स्वामी" अयं अर्थः चित्रपदस्य अन्तरक्रियायाः कारणेन उत्पाद्यते। तथा "आरुढवानरो वृक्ष: " इत्यत्र वानरपदे वानरारोहवानरारोहकर्माणि लक्षणा, आरूहपदं च तात्पर्यग्राहकम्।

तत्पुरुष समासे लक्षणा पूर्वपदे। राजपुरुषादि पदे राजपदार्थेन पुरुषादि पदार्थस्य साक्षात् अन्वय: भवति। निपातातिरिक्तनामार्थयोभेदे वोधस्याव्युत्पन्नत्वात्। “पट न घट “ इत्यत्र घटपटाभ्यां न साक्षात् एव अन्वय भवति निपातातिरिक्त इति। नीलो घट इत्यादि नामार्थयो: अभेदसम्वन्धेन अन्वयुत्पपत्ति भवति।

नीलघटयो: अभेद इत्यादौ नीलपदस्य नीलत्वे घटपदस्य घटत्वे लक्षणा। अभेद इत्यत्र आश्रय अभेद इत्यर्थ। अहिनकुलम् अत्र अहिनकुलमनुभावक पूर्णा समाहारे लक्षणा न जनयति। अस्मिन् विषये लेखकः वदति - "समाहारे द्वन्द्वे" इत्यादि पुस्तकानि। "अहिनकुलम् इत्यत्र परपदे नकुलपदे अहि समाहार लक्षणा, पूर्वपदे – अहिपदे तात्पर्यार्थं भवति।

चतुर्थाध्याय :(आसत्तिर्योग्यताकांक्षा: निरूपणम्)

न्यायसिद्धांतमुक्तावल्या: आसत्तिर्विषये उच्यते -सन्निधानन् तु पदस्यासक्तिरुच्यते।”

दिनकरीटीका :- विश्वनाथ आचार्य:सन्निधानान् आसत्ति उच्चते।   वाक्यार्थपदानां सम्यक् क्रमेण अव्यवधानेन उच्चारणेन तात्कालिक पदार्थोपस्थिति आसत्ति इति उच्यते । गिरिभुक्तमग्निमान् देवदत्तेन इत्यत्र शाब्दवोध न भवति।   नीलो घटो द्रव्यं पट इत्यत्र आसक्तिभ्रमात् शाव्दबोध जायते। छत्री कुण्डल वास्तस्वी देवदत्त इत्यत्र उत्तरपदस्मरणेन पूर्वपदस्मरणस्य अव्यवधानेन तत् पदस्मरणं सम्भवति।

रामरूद्रीटीका- एकस्य पदार्थस्य पदार्थस्य सह सम्बन्धः योग्यता उच्यते । वाक्ये पदार्थानां यदि परस्परं अन्वयं भवति तर्हि योग्यता अस्ति इति गम्यते। “अर्थवाधोयोग्यता” इति योग्यताया: लक्षणम् । योग्यता समवायसम्वन्धेन आत्मवृत्ति: धर्म:। विषये अस्ति। यथा- “बह्निना सिञ्चति" अत्र बह्निपदार्थेन सह सिञ्चनस्य कारणता दर्शिता चेदपि बह्नियां सिञ्चनबाधा इत्यर्थः उभयोः पदार्थयोः परस्परं सङ्गत्याभावात् वाक्यार्थस्य अर्थः न भवति । अन्येषु शब्देषु, क्रियापदस्य - वृत्ति बह्नि इत्यस्य विकारस्य ज्ञानाभावात् वा "बह्निना" इति धातोः सम्यक् विकारस्य अभावात् वा वाक्यार्थः न उत्पद्यते। यतः मम "बह्निना न सिञ्चति" इति ज्ञानम् अस्ति अर्थात्। अर्थात् सिञ्चनव्यवस्थायाः बह्निकरणत्वेन सम्वन्धभाव,अयोग्यताज्ञानं च अस्य वाक्यस्य ज्ञाने बाधकं भवति ।

आकांक्षाया: लक्षणप्रसंगे उक्तं – “यतपदेन” इति । यस्य पदस्य व्यतीत अन्वयवोध: न भवति अथवा अन्वयवोधस्य सामर्थ्य न भवति पूर्वपद सह परपदस्य साकांक्षा आकांक्षयुक्तः वा उच्यते। क्रियावाचकपदभावात् कत्तादिकारकादिपदेन अन्वयवोध: न शक्नुवन्ति, अतः क्रियाभिः सह कारकादिपदेन आकांक्षा भवति ।

पञ्चमाध्याय(तात्पर्यनिरूपणम्)

दिनकरीटीका- तात्पर्यस्य लक्षणं निर्धारयन् – “ वक्तुरिच्छा। “ अभिप्रेतः व्यक्तिःवाक्यार्थरूपजनकत्वरूपेन तात्पर्यार्थं भवति। । अन्यथा मौनिपुरुषस्य श्लोकादिषु अव्याप्ति भवति। तात्पर्यज्ञानं शाव्दबोध: जनयति। अर्थात् शाब्दवोधस्य वा वाक्यार्थस्य वा कारणत्वेन अर्थः न प्रत्यभिज्ञातः तर्हि सैन्दवमानय इत्यादिषु तादृशः नियमः नास्ति कस्मिंश्चित् काले — गमन-प्रकरणे सैन्धवशब्दस्य अश्वार्थे, अन्यथा — भोजनप्रकरणे सैन्धवशब्दस्य लावणार्थस्य वक्ता वा बोधकस्य वा तादृशः नियमः नास्ति । यदि तात्पर्यज्ञानस्य स्रोतः –

प्रकरणः, विशेषणः, देशः, पक्षः, अर्थः च कारणत्वेन ज्ञायते तर्हि अर्थः शाब्दवोधस्य कारणत्वेन न ज्ञायते । एतत् वक्तुं न शक्यते। यतः प्रकरणेषु कोऽपि वशी धर्मः न लक्ष्यते, प्रकरणेषु तात्पर्यज्ञानस्य आधारत्वेन अनुगतधर्मःचेदपि लाघवेन नानार्थस्य तात्पर्यज्ञानं प्रकरणादिषु अर्थस्य नियन्त्रणं करोति अत: तात्पर्यज्ञानं शाब्दवोधस्य कारणरूपेण स्वीकृयते ।

रामरुद्रीटीका- वक्तुः अभिप्रायः तात्पर्य एव। तादृशे वेदस्थले अपि वक्ता तात्पर्यज्ञानेन ईश्वर: कल्पते। यदि वेदवक्ता नास्ति तर्हि वेदस्य तात्पर्यकथनानुसारं कस्य अर्थस्य अनुभूयते? अतः ईश्वरः अनुरोधेन वा अर्थज्ञानार्थं वा वेदवाक्यजन्यार्थस्थानेऽपि कल्पितः अर्थात् दिव्यार्थः वेदवाक्यजन्यस्य शब्दार्थेन्द्रियस्य कारणं कल्प्यते। आचार्यस्य अर्थज्ञानं वाक्यस्य कारणं चेत्। एतत् वक्तुं न शक्यते। यतः सृष्टेः पूर्वमेव अध्यापकस्य अभावः आसीत्, तस्मात् अध्यापकस्य महत्त्वं शाब्दवोधस्य कारणं न भवितुम् अर्हति । यदि प्लावन: नास्ति तर्हि सृष्टेः आदिः सद्यः पूर्ववर्ती वा कथं कल्प्यते। अतः तादृशं चिन्तां कर्तुं न शक्यते। यतः जलप्रलयः अस्ति इति वार्ता वेदेभ्यः ज्ञातुं वा ज्ञातुं वा शक्यते, अतः सृष्टेः आरम्भः इति स्वीकारणीयम् । तादृशवार्तावाक्ये अपि अर्थानुसारेण न उच्यते इत्यर्थः तादृशस्य प्रमाणवाक्यस्य शाब्दवोधार्थे अपि ईश्वरीय तात्पर्यार्थं भवति ।परन्तु विसंवादिशुकवाक्ये शिक्षरितुरेव तात्पर्यज्ञानं कारणं भवति।

उपसंहार:-एतेषां समीक्षां कृत्वा न्यायसिद्धान्तमुक्तावल्याः वाक्यानि इति वक्तुं शक्यते शाब्दवोधनिरूपणम्, जातिशक्तिवादविचार: लक्षणानिरूपनम्, आकांक्षा-योग्यता-आसक्ति-तात्पर्यनिरूपनम् इत्यादिषु विस्तृतविमर्शः भवति। दिनकर्या दिनकरीव्याख्यायाम् गुढार्थातायाः तथा निपुणतया व्याख्याता तथा च रामभट्टेन रामरुद्रीटीका काठिन्यं व्याख्या कृता। न्यायसिद्धान्तमुक्तावल्यां तु कठिनविषयाणां चर्चा भवति । तथापि शब्दखण्डे दिनकारीटिकायाः रामरुद्रितटिकायाः च तुलनात्मकविमर्शेन विषयेषु सरलतया वाक्पटुतया च चर्चा भवति।

अध्यायविभागः(chapter division)

प्रथमः अध्याय :

१.अध्येयग्रन्थस्य सामान्यपरिचय:

२.भारतीयदर्शनस्य उद्भव विकासश्च

३.न्यायस्य किञ्चित् चर्चा।

४.न्याय दर्शनस्य प्रणेता गौतमाचार्यस्य सामान्यपरिचय:, दिनकराचार्यस्य सामान्यपरिचय, रामरूद्राचार्यस्य सामान्यपरिचय : ।

द्वितीयः अध्याय :

१.शाब्दबोधनिरुपनम्

२. जातिशक्तिवादविचार:

३.संकेतविषये विस्तृतविमर्श:

तृतीयः अध्याय:

१. लक्षणाया: विस्ततविमर्श:

२. सर्वेषु समासेषु लक्षणा भवति न वा ? तस्य विषये चर्चा।

चतुर्थः अध्याय :

१.आकांक्षा इत्यस्य विस्तृतविमर्श:

२.शाव्दबोधनिरूपणे आकांक्षायाः महत्त्वस्य चर्चा।

पञ्चमः अध्याय:

१.योग्यता इत्यस्या : विस्तृतविमर्श:, आसत्ति इति अस्या: विस्तृतविमर्श:

२.शाब्दबोधनिरूपणे योग्यताया: आसत्ते: च महत्वस्य चर्चा।

षष्ठः अध्याय:

१.तात्पर्यविषये विस्तृतविमर्श :

२. तात्पर्यं कथं शाव्दबोधस्य कारणम् इति चर्चा।

सहायकग्रन्थसूची

१. विश्वनाथन्यायपंचानन: न्यायसिद्धांतमुक्तावली (दिनकरीव्याख्या- रामरुद्रीव्याख्याभ्यां च सनाथीकृता) ; सम्पा. पाण्डुरंग जावजी श्रेष्टिभि: , वाराणसी : स्वीये निर्णयसागरख्यमुद्रणयन्त्रालय, १९३३ ।

२. विश्वनाथन्यायपंचानन: न्यायसिद्धांतमुक्तावली-दीनकरी (महादेवभट्टकृत दिनकरीसहित) सम्पा. राजाराम शुक्ल: , वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय २०११ ।

३.विश्वनाथन्यायपंचानन:, न्यायसिद्धांतमुक्तावली, सम्पा. श्री गोपालचन्द्र मुख्यपाध्याय:, कलकाता :वि.वि. को :, १९६३

४. अन्नभट्ट:, तर्कसंग्रह: (सटीका अध्यापनासहितश्च ; सम्पा. नारायनचन्दगोस्वामी , कोलकाता: संस्कृतपुस्तकभाण्डार, १८१३ बंगाब्द।

५. विश्वनाथपंचानन, कारिकावली- मुक्तावली; श्रीहरिरामशुक्लन्यायचार्य:, वाराणसी, चौखम्बा संस्कृत सीरीज आफिस, २००१